# सङ्ख्यालेखनम।

**स्वाध्यायः**

***सङ्ख्यायाः उचितं रूपं प्रयुज्य वाक्यं पुनर्लिखत।**

१. पाठ्यपुस्तके ______ गद्यपाठाः सन्ति। (७)

**उत्तरः** पाठ्यपुस्तके **सप्त** गद्यपाठाः सन्ति।

२. बिल्वदले ______ पत्राणि सन्ति। (३)

**उत्तरः** बिल्वदले **त्रीणि** पत्राणि सन्ति।

३. देवक्याः ______ अपत्यानि कंसेन हिंसितानि। (७)

**उत्तरः** देवक्याः **सप्त** अपत्यानि कंसेन हिंसितानि।

४. सङ्गीते ______ स्वराः भवन्ति। (७)

**उत्तरः** सङ्गीते **सप्त** स्वराः भवन्ति।

५. साहित्ये ______ रसाः सन्ति। (९)

**उत्तरः** साहित्ये **नव** रसाः सन्ति।

६. महानसे ______ रसाः सन्ति। (६)

**उत्तरः** महानसे **षड्** रसाः सन्ति।

७. भगवद्गीतायाः ______ अध्यायाः सन्ति। (१८)

**उत्तरः** भगवद्गीतायाः **अष्टादश** अध्यायाः सन्ति।

८. ______ प्रमुखाः दिशः सन्ति। (४)

**उत्तरः** **चतस्रः** प्रमुखाः दिशः सन्ति।

**(टीप** - दिश् हा शब्द स्त्रीलिंगी आहे.**)**

९. शाकुन्तलस्य ______ अङ्कः अतीव सुन्दरः अस्ति। (चवथा)

**उत्तरः** शाकुन्तलस्य **चतुर्थः** अङ्कः अतीव सुन्दरः अस्ति।

१०. संवत्सरे ______ अयने स्तः। (२)

**उत्तरः** संवत्सरे **द्वे** अयने स्तः।

**(टीप** - 'अयन' नपुंसकलिंगी आहे.**)**

११. देवः, मनुष्यः दानवः च प्रजापतेः ______ पुत्राः। (३)

**उत्तरः** देवः, मनुष्यः दानवः च प्रजापतेः **त्रयः** पुत्राः।

**(टीप** - 'पुत्र' हा शब्द पुंलिंगी आहे.**)**

१२. श्रावणमासे ______ तिथौ कृष्णजन्म भवति। (आठव्या)

**उत्तरः** श्रावणमासे **अष्टम्यां** तिथौ कृष्णजन्म भवति।

१३. नवरात्रं नाम ______ रात्रीणां समाहारः। (९)

**उत्तरः** नवरात्रं नाम **नवानां** रात्रीणां समाहारः।

१४. तस्य स्वागतार्थं ______ पक्वान्नानि कृतानि। (५)

**उत्तरः** तस्य स्वागतार्थं **पञ्च** पक्वान्नानि कृतानि।

१५. मम मातामही दिनस्य ______ औषधं सेवते। (दोनदा)

**उत्तरः** मम मातामही दिनस्य **द्विः** औषधं सेवते। किंवा

मम मातामही दिनस्य **द्विवारम्** औषधं सेवते।

१६. मया ______ अपि विदेशयात्रा न कृता। (एकदा)

**उत्तरः** मया **सकृत्** अपि विदेशयात्रा न कृता। किंवा

मया **एकवारम्** अपि विदेशयात्रा न कृता।

१७. सप्ताहस्य ______ अहं मन्दिरं गच्छामि। (तीनदा)

**उत्तरः** सप्ताहस्य **त्रिः** अहं मन्दिरं गच्छामि। किंवा

सप्ताहस्य **त्रिवारम्** अहं मन्दिरं गच्छामि।

१८. देवक्याः ______ अपत्यं नाम भगवान् कृष्णः। (आठवे)

**उत्तरः** देवक्याः **अष्टमम्** अपत्यं नाम भगवान् कृष्णः।

*** परीक्षेसाठी महत्त्वपूर्णः**

१. मम ______ सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

('षष्' सङ्ख्यायाः योग्यं शब्दरूपं लिखत।)

**उत्तरः** मम **षड्भिः** सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

२. एतेषां ______ वैद्यानामुपचारा उत्तमा न सन्ति किम्?

('षष्' सङ्ख्यायाः योग्यं शब्दरूपं लिखत।)

**उत्तरः** एतेषां **षण्णां** वैद्यानामुपचारा उत्तमा न सन्ति किम्?

३. ट्रॉम्बेतारापुरस्थौ ______ अणुविद्युत्प्रकल्पौ प्रसिद्धौ।

('२' सङ्ख्यायाः योग्यं शब्दरूपं लिखत।)

**उत्तरः** ट्रॉम्बेतारापुरस्थौ **द्वौ** अणुविद्युत्प्रकल्पौ प्रसिद्धौ।

४. नाट्यशास्त्रं नाम ______ वेदः।

('५' सङ्ख्यायाः योग्यं शब्दरूपं लिखत।)

**उत्तरः** नाट्यशास्त्रं नाम **पञ्चमः** वेदः।

५. ______ एताः समिधः श्रियः।

('७' सङ्ख्यायाः योग्यं शब्दरूपं लिखत।)

**उत्तरः** **सप्त** एताः समिधः श्रियः।